# ॥ श्री रामाष्टोत्तर शतनाम स्तोत्रम् ॥

॥ वंदना ॥

श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुकुलान्वयरत्नदीपम् ।

आजानुबाहुमरविन्ददलायताक्षं रामं निशाचरविनाशकरं नमामि ॥

॥ अथ ध्यानम् ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे मध्ये

पुष्पकमासने मणिमये वीरासने सुस्थितम् ।

अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं

व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

॥ इति ध्यानम् ॥

श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः ।

राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥१॥

जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।

विश्वामित्रप्रियो दान्तः शत्रुजिच्छत्रुतापनः ॥२॥

वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।

सत्यव्रतो व्रतधरः सदा हनुमदाश्रितः ॥३॥

http://lordrama.co.in

कौसलेयः खरध्वंसी विराधवधपण्डितः ।

विभीषणपरित्राता हरकोदण्डखण्डनः ॥४॥

सप्ततालप्रभेत्ता च दशग्रीवशिरोहरः ।

जामदग्न्यमहादर्पदलनस्ताटकान्तकः ॥५॥

वेदान्तसारो वेदात्मा भवरोगस्य भेषजम् ।

दूषणत्रिशिरो हन्ता त्रिमूर्तिस्त्रिगुणात्मकः ॥६॥

त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः ।

त्रिलोकरक्षको धन्वी दण्डकारण्यपावनः ॥७॥

अहल्याशापशमनः पितृभक्तो वरप्रदः ।

जितेन्द्रियो जितक्रोधो जितामित्रो जगद्गुरुः ॥८॥

ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ।

जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥९॥

सर्वदेवादिदेवश्च मृतवानरजीवनः ।

मायामारीचहन्ता च महादेवो महाभुजः ॥१०॥

सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ।

महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥११॥

http://lordrama.co.in

सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः ।

आदिदेवो महादेवो महापूरुष एव च ॥१२॥

पुण्योदयो दयासारः पुराणपुरुषोत्तमः ।

स्मितवक्त्रो मिताभाषी पूर्वभाषी च राघवः ॥१३॥

अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तमः ।

मायामानुषचारित्रो महादेवादिपूजितः ॥१४॥

सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः ।

श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः ॥१५॥

सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः ।

शिवलिङ्गप्रतिष्ठाता सर्वावगुणवर्जितः ॥१६॥

परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ।

परं ज्योतिः परंधाम पराकाशः परात्परः ॥१७॥

परेशः पारगः पारः सर्वदेवात्मकः परः ॥

इति श्रीरामचन्द्रस्यनाम्नामष्टोत्तरंशतम् ॥१८॥

http://lordrama.co.in

## Rāmāṣṭōttara Śatanāma Stōtram

|| Vaṃdanā ||

Śrīrāghavaṃ Daśarathātmajamaprамēyaṃ Sītāpatiṃ Raghukulānvayaratnadīpam |

Ājānubāhumaravindadalāyatākṣaṃ Rāmaṃ Niśācaravināśakaraṃ Namāmi ||

|| Atha Dhyānam ||

Vaidēhīsahitaṃ Suradrumatalē Haimē Mahāmaṇḍapē Madhyē

Puṣpakamāsanē Maṇimayē Vīrāsanē Susthitam |

Agrē Vācayati Prabhañjanasutē Tattvaṃ Munibhyaḥ Paraṃ

Vyākhyāntaṃ Bharatādibhiḥ Parivṛtaṃ Rāmaṃ Bhajē Śyāmalam ||

|| Iti Dhyānam ||

Śrīrāmō Rāmabhadraśca Rāmacandraśca Śāśvataḥ |

Rājīvalōcanaḥ Śrīmān Rājēndrō Raghupuṅgavaḥ ||1||

Jānakīvallabhō Jaitrō Jitāmitrō Janārdanaḥ |

Viśvāmitrapriyō Dāntaḥ Śatrujicchatrutāpanaḥ ||2||

Vālipramathanō Vāgmī Satyavāk Satyavikramaḥ |

Satyavratō Vratadharaḥ Sadā Hanumadāśritaḥ ||3||

http://lordrama.co.in

Kausalēyaḥ Kharadhvaṃsī Virādhavadhapaṇḍitaḥ |

Vibhīṣaṇaparitrātā Harakōdaṇḍakhaṇḍanaḥ ||4||

Saptatālaprabhēttā Ca Daśagrīvaśirōharaḥ |

Jāmadagnyamahādarpadalanastāṭakāntakaḥ ||5||

Vēdāntasārō Vēdātmā Bhavarōgasya Bhēṣajam |

Dūṣaṇatriśirō Hantā Trimūrtistriguṇātmakaḥ ||6||

Trivikramastrilōkātmā Puṇyacāritrakīrtanaḥ |

Trilōkarakṣakō Dhanvī Daṇḍakāraṇyapāvanaḥ ||7||

Ahalyāśāpaśamanaḥ Pitṛbhaktō Varapradaḥ |

Jitēndriyō Jitakrōdhō Jitāmitrō Jagadguruḥ ||8||

ṛkṣavānarasaṃghātī Citrakūṭasamāśrayaḥ |

Jayantatrāṇavaradaḥ Sumitrāputrasēvitaḥ ||9||

Sarvadēvādidēvaśca Mṛtavānarajīvanaḥ |

Māyāmārīcahantā Ca Mahādēvō Mahābhujaḥ ||10||

Sarvadēvastutaḥ Saumyō Brahmaṇyō Munisaṃstutaḥ |

Mahāyōgī Mahōdāraḥ Sugrīvēpsitarājyadaḥ ||11||

http://lordrama.co.in

Sarvapuṇyādhikaphalaḥ Smṛtasarvāghanāśanaḥ |

Ādidēvō Mahādēvō Mahāpūruṣa Ēva Ca ||12||

Puṇyōdayō Dayāsāraḥ Purāṇapuruṣōttamaḥ |

Smitavaktrō Mitābhāṣī Pūrvabhāṣī Ca Rāghavaḥ ||13||

Anantaguṇagambhīrō Dhīrōdāttaguṇōttamaḥ |

Māyāmānuṣacāritrō Mahādēvādipūjitaḥ ||14||

Sētukṛjjitavārīśaḥ Sarvatīrthamayō Hariḥ |

Śyāmāṅgaḥ Sundaraḥ Śūraḥ Pītavāsā Dhanurdharaḥ ||15||

Sarvayajñādhipō Yajvā Jarāmaraṇavarjitaḥ |

Śivaliṅgapratiṣṭhātā Sarvāvaguṇavarjitaḥ ||16||

Paramātmā Paraṃ Brahma Saccidānandavigrahaḥ |

Paraṃ Jyōtiḥ Paraṃdhāma Parākāśaḥ Parātparaḥ ||17||

Parēśaḥ Pāragaḥ Pāraḥ Sarvadēvātmakaḥ Paraḥ ||

Iti Śrīrāmacandrasyanāmnāmaṣṭōttaraṃśatam ||18||

http://lordrama.co.in